वर्षम्-२४ अङ्कः-२
अक्टूबर तः दिसम्बर २०२५ पर्यन्तम्
(आश्विन-शुक्ल-नवमी-तः पौष-शुक्ल-द्वादशी पर्यन्तम्)
(वैक्रमाब्दः-२०८२)

RNI No.
DELSAN/2002/8921
ISSN : 2278-8360

# संस्कृत-मञ्जरी

विद्वत्-समीक्षित एवं सन्दर्भित त्रैमासिकी शोध पत्रिका

A Peer- Reviewed & Refereed Quarterly Research Journal

दिल्ली संस्कृत अकादमी
दिल्ली सर्वकारः

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

## "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

अन्ताराष्ट्रिया त्रैमासिकी शोध-पत्रिका

आई०एस०एस०एन०-2278-8360

# संस्कृत-मञ्जरी

वर्षम्-२४ अङ्कः-२/२०२५

(अक्टूबर-तः दिसम्बरः २०२५ पर्यन्तम्)

(आश्विन-शुक्ल-नवमी-तः पौष-शुक्ल-द्वादशी पर्यन्तम्)

(वैक्रमाब्दः- २०८२)

**प्रधान-संरक्षकः अध्यक्षश्च**
**माननीयः श्री कपिल मिश्रा**
मन्त्री, कला-संस्कृति-भाषा-विभागः
दिल्लीसर्वकारः

**प्रधान-सम्पादकः**
**श्री के.महेशः**
**सचिवः**
कला-संस्कृति-भाषा-विभागः
दिल्ली-सर्वकारः

**सम्पादकः**
**शैलेन्द्रकुमारसिंहः**
**सचिवः**
दिल्ली-संस्कृत-अकादमी,
दिल्ली-सर्वकारः

**सहायक-सम्पादकः**
**प्रद्युम्नचन्द्रः**

**परामर्शकाः**

१. **प्रो० के.बी.सुब्बारायडु, पूर्वकुलपतिः**
राष्ट्रिय-संस्कृत-संस्थानम् केन्द्रीय-विश्वविद्यालयः, नवदेहली

२. **प्रो० देवीप्रसादत्रिपाठी, पूर्वकुलपतिः**
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम्, उत्तराखण्डः

३. **प्रो० रमेशभारद्वाजः, कुलपतिः**
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः, मुंदड़ी, कैथलः, हरियाणाप्रदेशः

४. **प्रो० शिवशङ्करमिश्रः, अध्यक्षः**
कुलगुरुः, महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयः, उज्जैनम्, मध्यप्रदेशः

५. **प्रो० रणजित् बेहेरा, आचार्यः**
कला-संकायः, संस्कृत-विभागः, दिल्ली-विश्वविद्यालयः, देहली

६. **डॉ. धनञ्जयमणित्रिपाठी, सहायक-आचार्यः**
संस्कृत-विभागः, जामिया मिल्लिया केन्द्रीय-विश्वविद्यालयः, नवदेहली

**सम्पर्कः**
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाषः - ०११-२०९२०३६२
अणुसङ्केतः - sanskritpatrika.dsa@gmail.com
**वेब साईट** - https://sanskritacademy.delhi.gov.in
**ग्राहकतायाः कृते**
प्रत्यङ्कं मूल्यम्- पञ्चविंशतिः रूप्यकाणि
वार्षिकशुल्कम् - शतं रूप्यकाणि

# अनुक्रमणिका


| संस्कृतभागः- | पृष्ठसंख्या |
|---|---|
| सम्पादकीयम् | III |
| १. विष्णुमूर्त्तीनां विधानम्<br>–डॉ. रितिका–अग्रवाल–जैनः | १ |
| २. स्वार्थिकप्रत्ययविमर्शः<br>–डॉ. सुधाकरमिश्रः | ११ |
| ३. मनुस्मृतेः प्रासङ्गिकता<br>–डॉ. राजकुमारपिलवालः | १९ |
| ४. मीमांसायां काव्यशास्त्रे च शब्दार्थयोः स्वरूपम्<br>डॉ. मनीषा प्रवीनः | २२ |
| **हिन्दीभागः–** | |
| ५. शिक्षण-अधिगम प्रक्रिया – शैक्षिक मनोविज्ञान की भूमिका<br>–डॉ. अशोक कुमार | २६ |
| ६. समाज में नारी की स्थिति – वेद के परिप्रेक्ष्य में<br>– डॉ. संगीता कुमारी | ३२ |
| ७. वेदों में गणितीय सिद्धान्त – अवधारणा एवं वैज्ञानिक दृष्टि<br>–डॉ. रश्मि यादव | ३६ |
| ८. कुमाऊँ के प्रमुख ऐतिहासिक काव्यकार-एक दृष्टि<br>–डॉ. लज्जा भट्ट | ४४ |
| ९. अथर्ववेद में वृक्ष – वनस्पतियों के उपकारक तत्त्व विमर्श<br>–डॉ. ज्योति प्रसाद गैरोला | ५२ |
| १०. आचार्या अवन्तिसुन्दरी का काव्यशास्त्रीय अवदान<br>सुश्री प्रियांशी | ५९ |
| ११. आचार्य जानकीवल्लभ शास्त्री प्रणीत संस्कृत साहित्य<br>डॉ. राजेन्द्र गौतम | ६७ |
| **अंग्रेजीभागः-** | |
| १२. **Chhath- The Grand Festival of a Refined Civilization**<br>Dr. Dhananjay kumar Mishra | ७८ |

# सम्पादकीयम्

**अयि सुरभारतीसमुपासकाः सुहृदयाः!**

संस्कृतसेवासमाराधनैकव्रताः भवतां भवतीनाञ्च जानन्त्येव यत् संस्कृतभाषा भारतीय सांस्कृतिकजीवनस्य सम्पूर्णमानवधर्मस्य च संपोषिका संवाहिका चेति सर्वेषां एकं ध्रुवं मतं वर्तते, मत्वा सर्वाणि कर्माणि सेव्यते, इति मानवः। वस्तुतः स एव मानवो वर्तते यः सम्यक् रूपेण समालोच्य स्वकार्यं धर्मेण समाचरति अन्ये तु मनुष्यरूपेण मृगाश्चरन्ति एवं सूक्तिं सार्थकं कुर्वन्ति। येषां आचरणं धर्मस्यानुरूपम् वर्तते त एव समेषां मानवानां कृते पथप्रदर्शकाः वर्तन्ते। धर्मं किम् एतत् कृते शास्त्रेषु मुनिनां वचनं वर्तते–धारणाद् धर्मः इति। तत्र शास्त्रकारेण अपि निर्दिष्टं–

**धृतिः क्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्॥**

एते सन्ति धर्मस्य स्तम्भाः, इमान् विहाय नास्ति विश्वस्य मानवः मानवत्वेन जीवितुं शक्नोति। परन्तु साम्प्रतं धर्मशब्दस्यार्थः विवाद ग्रस्तः सञ्जातः। एतेन सम्प्रदायविशेषस्यार्थबोधः संयोजनं नोचितम्। मानवेषु पशुषु च भेदो धर्माधारेण नीतिकारेण निर्दिष्टं–

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषः, धर्मेणहीनः पशुभिस्समानः॥**

एतेन दशलक्षणसमन्वितेन धर्मेण यत्पुण्यं मानवः सञ्चिनोति तदेवं पुण्यं जीवनस्य पाथेयं भवतीति। एतन्निवेदनेन सह दिल्लीसंस्कृतअकादम्याः 'संस्कृतमंजरीति' शोधपत्रिकायाः चतुर्विंशतितमवर्षस्य अक्टूबरतः दिसम्बर २०२५ पर्यन्तं द्वितीयमङ्कं सम्पाद्य गीर्वाणवाणीप्रणयिनां सुधियां पाठकानां च करकमलेषु सानन्दमुपहरामः।

संस्कृतभाषायाः सेवायां निरन्तरं सन्नद्धायां दिल्लीसंस्कृताकादम्याः संस्कृतमंजरी–त्रैमासिक–शोधपत्रिकायां प्रतिष्ठितविद्वद्भिः सह शोधच्छात्राणामपि उत्तमाः लेखाः प्रकाश्यन्ते। आशासे शोधपत्रिकेयं सर्वैः पाठकैः सादरं स्वीकरिष्यते सोत्साहं च पठिष्यत इति।

शकाब्दः १९४७(पौष–कृष्ण–एकादशी)
(सफलाएकादशी)

निवेदकः
**( शैलेन्द्रकुमारसिंहः )**
सचिवः

# विष्णुमूर्त्तीनां विधानम्

-डॉ. रितिका-अग्रवाल-जैनः

**विभिन्नयुगानुसारं रूपः एवञ्च वर्णः**- ईश्वरस्य साकारस्वरूपः कालान्तरे विभिन्नप्रतिमानां रूपधारणं कृतवान्। कृतः त्रेता तथा द्वापरयुगे व्यक्तिः भगवतः स्वयमेव दर्शने समर्थः आसीत्, किन्तु कलियुगे ईश्वरस्य आराधना प्रतिमाभिः एव सम्भवः वर्तते। अतः पुराणेषु वर्णितम् ईश्वरस्य साकाररूपं कलाकारैः विभिन्नकलाभिः सांसारिकभूमिकायाम् आनेतुं प्रयासं कृतमस्ति।[१] श्रीमद्भागवतपुराणे प्रसङ्गः अस्ति यत् प्रत्येकयुगे श्रीहरेः रूपः एवञ्च वर्णः विभिन्नप्रकारस्य भवति। सतयुगे भगवान् चतुर्भुजः भवति। सः रुद्राक्षस्य माला, दण्डः तथा कमण्डलुः धारयति। सः शरीरे कृष्णमृगचर्मः एवञ्च स्कन्धे यज्ञोपवीतं धारयति। अस्मिन् रूपे तस्य शरीरे आभूषणानि न भवन्ति। तस्य शिरसि जटा भवति एवञ्च सः वल्कलवस्त्रं धारयति तथा तस्य शरीरस्य वर्णः श्वेतः भवति।[२] अस्मिन् युगे हंसः, ईश्वरः, पुरुषः, सुपर्णः वैकुण्ठादिनाम्ना भगवतः पूजा क्रियते। अयं भगवतः शान्तरूपः वर्तते। त्रेतायुगे भगवद्रूपः परिवर्तितः भवति। यद्यपि चतुर्भुजाः एव भवन्ति किन्तु तेषां वर्णः रक्तः भवति। सः स्वभुजासु स्रुक्, स्रुवादयः यज्ञपात्राणि च धारयति। तस्य शिरसि स्वर्णकेशाः भवन्ति एवञ्च कटिप्रदेशे मेखला भवति।[३] अस्मिन् युगे सः वेदप्रतिपादितं यज्ञरूपं प्रकटयति। विष्णुः यज्ञः, पृश्निगर्भः, सर्वदेवः, उरुकमः, वृषाकपिः, जयन्तः एवञ्च उरूगादिनाम्ना अस्य आराधना क्रियते।[४] द्वापरयुगे भगवान् श्यामवर्णस्य भवति, सः पीताम्बरं धारयति एवञ्च स्वभुजासु शङ्खः, चक्रः, गदादयः आयुधाः धारयन्ति। तस्य वक्षस्थले श्रीवत्सस्य चिह्नम् भृगुलता तथा कौस्तुभमणिः सुशोभितः भवति। एभिः चिह्नैः भगवन्तं ज्ञातुं शक्यते।[५] कलियुगे भगवतः वर्णः श्यामात् कृष्णः भवति। येन प्रकारेण नीलमणेः उज्ज्वलकान्तिः उद्भवति, तथैव आभा तस्मात् शरीरात् कृष्णवर्णात् उद्भवति। सः सर्वाङ्गैः, कौस्तुभादि-उपाङ्गैः तथा सुदर्शनचक्रादि-आयुधैः सुशोभितः भवति। सुनन्दादयः पार्षदाः तस्य सेवायां सदैव लीनाः भवन्ति।[६] पुराणानाम्-एतेषामेव विभिन्नस्वरूपाणाम् एवञ्च वर्णानाम् आधारे

१ प्रतिमा विज्ञान द्वितीय परिच्छेद, पृ. ४७

२. कृते शुक्लश्चतुर्बाहुर्जटिलोवल्कलाम्बरः।
कृष्णाजिनोपवीताक्षान् विभ्रद्दण्डकमण्डलुः।। श्रीमद्भा. ११/५/२१
उद्धृतं प्रतिमा विज्ञान द्वितीय परिच्छेद, पृ. ४८

३. हिरण्यकेशस्त्रय्यात्मा स्रुकस्रुवाद्युपलक्षणः।। श्रीमद्भा. ११/५/८४
उद्धृतं प्रतिमा विज्ञान, पृ. ४८


४. श्रीमद्भा. ११/५/२६

५. द्वापरे भगवाच्छ्यामः पीतवासा निजायुधः।
श्री वत्सादिभिः कैश्च लक्षणैरूपलक्षितः।। श्रीमद्भा. ११/५/२७
उद्धृतं प्रतिमा विज्ञान, पृ. ४८

६. कृष्णवर्ण त्विषाकृष्णं साङ्गोपाङ्गस्त्रपार्षद्रम्।। श्रीमद्भा. ११/५/३२
उद्धृतं प्रतिमा विज्ञान, पृ. ४८

कालान्तरे भगवतः विष्णोः विभिन्नप्रतिमाः निर्मिताः।


**विष्णोः सुदर्शनचक्रः**- विष्णोः प्रियास्त्रं सुदर्शनचक्रः कथितमस्ति। एवञ्च अयं तस्य स्वविशेषायुधः वर्तते। अस्य चक्रस्य कल्पनायाः अङ्कुराः वैदिकसाहित्ये एव निहिताः सन्ति। कूनमतस्य[७] समर्थनं कुर्वन् मैक्डोनलमहोदयेन कथितमस्ति यत् विष्णोः चक्रः सूर्यस्य प्रतीकः वर्तते एवञ्च ऋग्वेदे ५/६३/४ सूर्यम् एकः विचित्रायुधः अपि कथितः "सूर्यो ज्योतिश्चरति चित्रमायुधम्।" किन्तु वस्तुतः एवं नास्ति। ऋग्वेदे तथा अथर्ववेदे संवत्सरस्य वर्षस्य वा एकचक्ररूपे कल्पना प्राप्ता भवति। अस्मिन् संवत्सरचक्रे १२ मासाः- तथा तिस्रः चतस्रः वा नाभयः। अस्य ३६० दन्ताः सन्ति। एवञ्च अयम् अक्षयः तथा अमरचक्रः सदैव घूर्णति। सम्पूर्णविश्वः अस्मिन्नैव निवसति(-) रूपमण्डने विष्णोः केषाञ्चन् विशिष्टमूर्तीनामपि विवेचनं वर्तते। एताः विष्णुमूर्त्तयः चतुर्मुखवर्गस्य वर्तन्ते। यस्य भुजाः अष्ट, द्वादश, षोडश एवञ्च विंशतिपर्यन्तम् भवति। इत्थं बैकुण्ठः अष्टभुजी, अनन्तः द्वादशभुजी त्रैलोक्यमोहने षोडशभुजी भवति एवञ्च विश्वमुखः विंशतिभुजयुक्ताः भवन्ति। संख्यादृष्ट्या सर्वे विष्णुमूर्तयः चतुर्मुखी सन्ति किन्तु त्रैलोक्यमोहनस्य मुखं रूपमण्डनः एवञ्च अपराजितपृच्छानुसारम् अन्य-विष्णुमूर्तीनाम् अपेक्षया किञ्चित् भिन्नः भवति। त्रैलोक्यमोहनं विहाय वैकुण्ठानन्तः एवञ्च विश्वमुखस्य चतुर्मुखाः क्रमशः नरः, नरसिंहः, स्त्रीमुखः एवञ्च वराहमुखाः भवन्ति। त्रैलोक्यमोहनस्य प्रतिमायां वराहाननस्य स्थाने कपिलाननः कथितमस्ति। भुजानाम् आयुधाः एवञ्च मुद्रायोजना इत्थम् अस्ति।[८]




**भारतीय शिल्प संहिता-पृ. ४३**

७. कून- हेरबकुम्फ्ट डेस फॉयर्स उण्ट् डेस ग्योटरट्रांक्स, पृ. २२२
उद्धृतं-वैदिक देवताः उद्भव और विकास, पृ. ३५०, अ. ५

८. रू. म. भूमिका, पृ. ५७




**भारतीय शिल्प संहिता-पृ. १०७**

वैकुण्ठः दक्षिणहस्तेषु (१) गदा (२) खड्गः (३) चक्रः (४) शरः। वामहस्तेषुः (५) शङ्खः (६) खेटकः (७) धनुः (८) पद्मः अनन्तः- दक्षिणहस्तेषु (१) गदा (२) खड्गः (३) चक्रः (४) वज्रः (५) अङ्कुशः (६) शरः। वामहस्तेषु (७) शङ्खः (८) खेटकः (९) धनुः (१०) पद्मः (११) दण्डः (१२) पाशः।

**त्रैलोक्यमोहनः**- दक्षिणहस्तेषु (१) गदा (२) वज्रः (३) अङ्कुशः (४) बाणः (५) शक्तिः (६) चक्रः (७) वरः (८) योगः। वामहस्तेषु (९) मुद्गरः (10) पाशः (११) शार्ङ्गः (१२) शङ्खः (१३) अब्जः (१४) कुण्डिका (१५) शृङ्गी (१६) योगः।

**विश्वरूपः**- दक्षिणहस्तेषु (१) पताका (२) हलः (३) शङ्खः (४) वज्रः (५) अङ्कुशः (६) शरः (७) चक्रः (८) बीजपूरकः (९) वरः (१०) योगः।

**वामहस्तेषु**- (११) पताका (१२) दण्डः (१३) पाशः (१४) गदा (१५) शार्ङ्गः (१६) उत्पलम् (१७) शृङ्गी (१८) मूसलः (१९) अक्षः (२०) योगः।[९]

अस्य चतुर्प्रकारस्य विष्णुमूर्तयः रूपमण्डनानुसारं गरुडासीनाः भवन्ति। रूपमण्डनस्य चतुर्मुखविष्णूनाम् वर्णनम् अपराजितपृच्छायाः आधारे वर्तते।[१०] (अपरा. २१९/२४/४१) अग्निपुराणे (४९/१८-२३) त्रैलोक्यमोहनः एवञ्च विश्वरूपस्य विवरणं वर्तते। अग्निपुराणानुसारं त्रैलोक्यमोहनः षोडशभुजी न भूत्वा अष्टभुजी वर्तते एवञ्व तेषाम् आयुधा अपि भिन्नाः सन्ति।[११]

विश्वरूपम् अग्निपुराणे विंशतिभुजायुक्तं कथितमस्ति। किन्तु अग्निपुराणे वर्णितस्य विश्वरूपस्य आयुधयोजना रूपमण्डनः एवञ्च अपराजितपृच्छायाः अपेक्षया अपूर्णा एवञ्च भिन्नाः वर्तते।[१२]

९. रू.म. भूमिका, पृ. ५८

१०. रू. म. भूमिका, पृ. ५७

११. गैलोय्यमोहनस्ताक्ष्र्ये अष्टबाहुस्तु दक्षिणे।।
चक्रं खड्गञ्च मुसलमङ्कुशं वामके करे।

१२. उद्धृतं रू.म. भूमिका, पृ. ५८, अग्निपुराण ४९/२१-२३

**१. युगवर्णभेदाभ्यां विष्णुमूर्त्तयः**- विष्णोः पूजा वासुदेवरूपे संकर्षणेन सह वा क्रियते स्म। संकर्षणः एवञ्च वासुदेव अन्यदेवेषु सर्वोपरिः सर्वेश्वरः मन्यते स्म। पञ्चवृष्णिषु चतुर्व्यूहस्य चतुर्देवानां पृथक्-प्रतिमाः अपि प्राप्ताः भवन्ति। उज्जैने गुप्तकालीना चतुर्व्यूहस्य सुन्दरप्रतिमा वर्तते। अस्याः प्रतिमायाः परितः चतुर्स्वरूपाः वर्तन्ते-वासुदेवः, सकर्षणः, प्रद्युम्नः तथा अनिरुद्धः। प्रतिमानां मन्दिरस्य अपि परितः चतुर्द्वाराः भवन्ति स्म येन सर्वेषां समानं महत्त्वं भवेत्। विदिक्षु वृष्णीनां चतुर्प्रमुखाः -बलरामः, प्रद्युम्नः, साम्बः एवञ्च अनिरुद्धस्य पूजाया केन्द्रः आसीत्। ततः श्रीकृष्णस्य गरुड़ध्वजेन सहैव बलरामस्य ताड़ध्वज तथा प्रद्युम्नस्य मकरध्वजः अपि प्राप्तः अभवत्। विष्णुसंहितायां (६७/२) चतुर्व्यूहाः एवञ्च वायुपुराणे (७९/१-२) प्राप्यते पञ्चवृष्णीनां चर्चा।[१३] चतुर्षु युगेषु वासुदेवः, संकर्षणः, प्रद्युम्न एवञ्च अनिरुद्धस्य प्रतिमाः क्रमशः श्वेतः, रक्तः, पीतः एवञ्च कृष्णवर्णस्य निर्मीयात्।[१४] एते देवाः द्विजादिवर्णानां कृते पूज्याः सन्ति एवञ्च एतेषां शिरः क्रमशः छत्रः कुक्कुटः- अण्डः, गपुषः एवञ्च बालेन्दुसदृशः गोलाकारः भवेत्।[१५]

**२. वर्णभेदेन विष्णुमूर्तीनां शुभत्वम्**- नारायणः, केशवः, माधवः एवञ्च मधुसूदनस्य मूर्तीनां पूजनं ब्राह्मणानां कृते सुखप्रदं वर्तते।[१६] मधुसूदनः एवञ्च विष्णो पूजनं क्षत्रियाणां कृते फलप्रदं वर्तते।[१६] त्रिविक्रमः एवञ्च वामनस्य पूजनं वैश्यानां कृते सुखप्रदम्।[१७] श्रीधरस्य मूर्तिः शूद्राणां कृते सौख्यदायिनी एवञ्च पूज्या वर्तते।[१८] भेदः, भिल्लः, किरातः, कुम्भकारः, वैश्यः एवञ्च चक्रध्वजानां कृते हृषीकेशस्य प्रतिमा सुखप्रदा वर्तते।[१९] पद्मनाभः समस्तप्राणिनां कृते सुखदाता अस्ति ब्रह्मचारिणः एवञ्च सन्यासिनां कृते दामोदरः सुखप्रदः वर्तते।[२०] हरिः, हरः,

---

१३. संकर्षणो वासुदेवः प्रद्युम्नः साम्ब एव च।
अनिरुद्धश्च पंचैते वेशवीराः प्रकीर्तिता।। भारतीय कला और संस्कृति अ-१२, पृ. ४५-४६

१४. वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः।।
श्वेतरक्तपीतकृष्णाः [ः] क्रमात् कल (ली) युगादिषु।।
रू.म. अ-३, पृ. १३२ श्लो, १, युगवर्णभेदाभ्यां विष्णुमूर्त्तयः का विवरण प्रतिमा विज्ञान, पृ. ४८, द्वितीय परिच्छेद में भी मिलता है।

१५. पूज्या द्विजादिभिश्चैषां छत्राभं कुक्कुटाण्डवत्।
त्रपुषाभञ्च बालेन्दुरूपं कुर्याच्छिरः क्रमात्।। रू.म. अ-३, पृ. १३२ श्लो, २

१६. नारायणः केशवश्व माधवो मधुसूदनः।
पूजिता मूर्त्तयोः ह्येता विप्राणां सौख्यदायकाः।। रू.म.अ-३, पृ. १३२, श्लो. ३

१७. मधुसूदनविष्णु च क्षत्रियाणां फलप्रदौ।
त्रिविक्रयो वामनश्च वैश्यानामर्चयेच्द्रमा (अर्जने शुभौ)।।, रू.म.अ-३, पृ. १३२, श्लो.४, रू.म.अ-३, पृ. १३२ श्लो. ३

१८. पूजितो श्रीधरी मूर्तिः शूद्राणां सोख्यदायिनी।
चक्रकृद्रजकानाञ्च नटस्य वरटस्य च।।, रू.म.अ-३, पृ. १३२, श्लो. ५
रू.म.अ-३, पृ. १३३ श्लो. ४

१९. भेदभिल्लकिरातानां हृषीकेशः सुखप्रदः।
कुम्भकारवणिक्वेश्यचद्रिका (क) ध्वनिनामपि।। रू.म.अ-३, पृ. १३२, श्लो. ६
रू.म.अ-३, पृ. १३२ श्लो. ५

२०. सर्वेशां प्रकृतीनाञ्च पद्मनामः सुखावहः।
दामोदरः सौख्यदः स्याद्ब्रह्मचर्यैकदण्डिनो।। रू.म.अ-३, पृ. १३२, श्लो. ७
रू.म.अ-३, पृ. १३२ श्लो. ६

हिरण्यगर्भः, नृसिंहः, वामनः एवञ्च वराहः सर्वेषां वर्णानां कृते सुखप्रदाः एवञ्च हितकराः वर्तन्ते।[२१]

विष्णोः, नारायणस्य, केशवस्य, माधवस्य एवञ्च मधुसूदनरूपस्य प्रतिमानां स्थापना सदैव ब्राह्मणानां कृते सुखदायका भवति।[२२] मधुसुदनस्य एवञ्च विष्णोः प्रतिमाः क्षत्रियाणां कृते शुभफलदायकाः वर्तन्ते यतोहि वैश्यानां कृते त्रिविक्रमस्य एवञ्च वामनस्य मूर्तेः पूजनं शुभकारकं वर्तते।[२३] श्रीधरस्य मूर्तिः अन्त्यजवर्णानां शुभफलदात्री वर्तते अतः जीर्णपादुकासन्धाता, म्लेच्छः, नटः एवञ्च दासानां कृते तस्या पूजा शुभप्रदा भवति।[२४] भिल्लः किरातः कुम्भकारः वैश्यः, तैली एवञ्च कलालानां कृते हृषीकेशस्य प्रतिमा शुभदायका वर्तते।[२५] सर्वेषां जातीनां कृते पद्मनाभस्य मूर्तिः शुभदायका वर्तते। ब्रह्मचारीणाम् एवञ्च एकदण्डीसन्यासिनां कृते दामोदरस्य मूर्तिः सुखदात्री वर्तते।[२६] हरिः, हिरण्यगर्भः, नरसिंहः, वामनः एवञ्च वराहस्य मूर्तयः सर्वेषां वर्णानां कृते अत्यानंददायकाः स्वीकृताः।[२७] सा स्थापितप्रतिमा विसर्जनयोग्या वर्तते-यस्य अङ्गप्रत्यङ्गानि खण्डितानि भवन्ति किन्तु नखाभूषणमाला एवञ्च शस्त्रं भग्नं भवेत् चेत् प्रतिमा स्वीकार्या अस्ति अर्थात् तस्याः त्यागः न करणीयः।

**३. श्रीहरेश्चतुर्विंशतिमूर्त्तयः**- भगवतः विष्णोः (१) नारायणरूपस्य प्रतिमायाः आयुधक्रमः दक्षिणाधक्रमेण शङ्खः, पद्मः, गदा चक्रश्च भवति। (२) वामनस्य शङ्ख, गदा, चक्रः, पद्मः, गदा च (३) पद्मनाभस्य शङ्खः, पद्मः, चक्रः तथा गदा (४) उपेन्द्रस्य आयुधक्रमः शङ्ख गदा, चक्रः, पद्मश्च कर्तव्यः, इत्थमेव (५) कृपणस्य शङ्खः, गदा, पद्मः, चक्रश्च (६) हरेः शङ्खः, पद्मः, चक्र, गदा वा क्रमेण आयुधक्रमः करणीयः। अयं क्रमः यदि प्रतिद्वितीयहस्तक्रमेण परिवर्तनं कुर्यात् चेत् (७) मधुसूदनः (८) केशवः (९) सङ्कर्षणः (१०) दामोदरः, (११) प्रद्युम्नः (१२) वासुदेवः (१३) माधवः (१४) विष्णुः (१५) अनिरुद्धः (१६) पुरुषोत्तमः (१७) जनार्दनः (१८) अक्षोधजः (१९) त्रिविक्रमः (२०) गोविन्दः (२१) श्रीधरः (२२) हृषिकेशः (२२) अच्युतः तथा (२४) नृसिंहस्य रूपं निर्मितं भवति।[२८] एतत् विवरणम् अपूर्णं त्रुटिपूर्णश्च दृश्यते। अतिसंक्षिप्तीकरणात् अयम् भ्रमः अपि उत्पन्नः करोति। तथा उपलब्धपाठः अयं 'स' इत्यस्य प्रयोगः अपि आश्चर्यपूर्णः अस्ति अत्र सूत्रधारनाथायाः चतुर्विंशतिमूर्तिविवरणम् अग्निपुराणं (अध्यायः ४८) पद्मपुराणं (पातालखण्डः अध्यायः ७८) चतुवर्ग चिन्तामणिः (१ पृष्ठः ११४-११५) मानसोल्लासः (३, ३, ६८८-६९४) रूपादिग्रन्थानां विपरीतः अपि दृश्यते चतुर्विंशतिमूर्तीनां क्रमः नाथा नारायणात् आरम्भः करोति। देवतामूर्तिप्रकरणे विष्णोः चतुर्विंशतिमूर्तीनां वर्णनं लक्ष्यपूर्णं एवञ्च सम्यक्रूपेण प्राप्यते- केशवः पचशगक्ष मधुसूदनः श्रृंशपगा। सङ्कर्षणो गंशपावै दामोदर-पंशगचा।। वासुदेवो गशंचपैः प्रद्युम्नः श्रक्रशंगपः विष्णुर्गदापशं चक्री माधवो गचशङ्खयैः।। अनिरुद्धः चक्रगापाशः त्रिविक्रमः

२१. हरिर्हरो हिरण्यगर्भो नरसिंहोऽथ वामनः।
वराहः सर्ववर्णेपु सौख्यदो हितकारकः।। रू.म.अ-३, पृ. १३२, श्लो. ८, दे.मू.प्र. अ-५, पृ. ३६
रू.म.अ-३, पृ. १३२ श्लो. ७

२२. रू.म.अ-३, पृ. १३४ श्लो. ८

२३. दे.मू.प्र. अ-५, पृ. ३६

२४. दे.मू.प्र. अ-५, पृ. ३६

२५. दे.मू.प्र. अ-५, पृ. ३६

२६. दे.मू.प्र. अ-५, पृ. ३६

२७. दे.मू.प्र. अ-५, पृ. ३६

२८. वास्तुमञ्जरी, पृ. २६०

पंगचशः। श्रीधरः पद्मैनारायणं शंपगचः।। पद्मनामः शंपचांग उपेन्द्रः शंगदाचपैः। हरिः शंचपगः पूज्यः कृष्णः शंपचक्रम्रत्।। अधरं दक्षिणे हस्तयारभ्य सृष्टिमार्गतः। चतुर्विंशतिमूर्त्तीनां सर्वगैवायुधक्रमः।।[२९]

मण्डनेन ग्राह्य एवञ्च त्याज्यप्रतिमानां सम्बन्धे कथितमस्ति यत् स्थापितप्रतिमानाम् अङ्गप्रत्यङ्गः खण्डिताः भवेयुः चेत् सः त्याज्यः अस्ति किन्तु नखाभरणं शस्त्रं वा खण्डितं भवेत् चेत् सः त्याज्यः नास्ति। मण्डनेन विष्णोः चतुर्विंशतिमूर्तीनां लक्षणं "स्कन्दपुराणं" "अग्निपुराणं" मानसोल्लासात् वा ग्रहणं कृतमस्ति एवं दृश्यते, किन्तु केशवः जनार्दनश्च अश्रोक्षः नृसिंहश्च तथा हरिः एवञ्च वामनस्य आयुधक्रमः सदृशः वर्तते इत्थं त्रयाणां स्वरूपाणाम् आयुधक्रमः नास्ति यतोहि रूपमण्डने पुनरावृत्तिः नास्ति।[३०] चतुर्विंशतिमूर्तीनाम् आयुधक्रमः अनया तालिकया द्रष्टुं शक्यते–

| क्रम | प्रतिमानाम | आयुधक्रमः[३१] | क्रम | प्रतिमानाम | आयुधक्रमः |
|---|---|---|---|---|---|
| १ | वासुदेवः | ग श च प | १३ | प्रद्युम्नः | च श ग प |
| २ | केशवः | प च श ग | १४ | त्रिविक्रमः | प ग श च |
| ३ | नारायणः | श प ग च | १५ | नरसिंहः | प ग श च |
| ४ | माधवः | ग च श प | १६ | जनार्दनः | प च श ग |
| ५ | पुरुषोत्तमः | च प श ग | १७ | वामनः | श च ग प |
| ६ | अधोक्षजः | प ग श च | १८ | श्रीधरः | प च ग श |
| ७ | संकर्षणः | ग श प च | १९ | अनिरुद्धः | च ग श प |
| ८ | गोविन्दः | च ग प श | २० | हृषीकेशः | ग च प श |
| ९ | विष्णुः | ग प श च | २१ | पद्मनाभः | श प च ग |
| १० | मधुसूदनः | च श प ग | २२ | दामोदरः | प श ग च |
| ११ | अच्युतः | ग प च श | २३ | हरिः | श च ग प |
| १२ | उपेन्द्रः | श ग च प | २४ | कृष्णः | श ग प च |

२९. शं-प-ग-चे, शं-च-ग-ग, शं-प-च-गेः शं-गा-च-प-यः।। शं-गा-प-चे,- शं-प-च-गे-र्दक्षणाद्यः करा क्रमात्।
चतुराऽवर्तविष्णो चतुर्विंशति मूर्त्तयः।।१०३।।
नारायणो वामनोऽथ पद्मनाभश्च नामतः।
उपेंद्र- कृपणो च हरि-र्मधुसूदन-केशवो।।१०4।।
सङ्कर्षणो-दामोदर-प्रद्युम्नो-वासुदेवत्।
माधवो-विष्णु-डरनिरुद्ध ततस्ततः प्ररुषोतम।।१०५।।
जनार्दने-डरोघज- त्रिविक्रमो-गोविंदः।
श्रीधरो-हपिकेशेऽ-च्यतुत श्रद्धो (?) नृसिंह च क्रमेण हि।।१०६।। वास्तुमञ्जरी, पृ. २६० श्लो १०२-१०६, (सूत्रधारनाथेनविरचितम्)

३०. रू.म. ३, ९-३० उद्धृतं- दे.मू.प्र. भूमिका, पृ. (xiv)

३१. रू.म. ३, ९-२०उद्धृतं दे.मू.प्र. भूमिका, पृ. (xiv), दे.मू.प्र. भूमिका, पृ. (xiv) देवी-देवताओं के अस्त्र-शस्त्र पृ. ५९, शं =शंख, च= चक्र, ग=गदा, प=पद्म

**श्रीहरेश्चतुर्विंशतिमूर्त्तयः**- १. वासुदेवः गदा शङ्खः एवञ्च कमलधारयन् दृश्यते। २. केशवः कमलं, शङ्खः, चक्रः एवञ्च गदाधारयन् दृश्यते।[३२] ३. नारायणः शङ्खः, पद्मः, गदा एवञ्च चक्रधारयन् भवति तथा ४. माधवः गदा, चक्रः, शङ्खः एवञ्च कमलधारयन् भवति। ५. पुरुषोत्तमः चक्रः कमलं शङ्खः एवञ्च गदाधारणं करोति।[३३] ६. अद्योक्षजः कमलं गदा शङ्खः, कमलं एवञ्च सुदर्शनः धारयति।[३४] ७. संकर्षणः गदा, खङ्गः, कमलं एवञ्च चक्रं धारयति।[३५] ८. गोविन्दः चक्रः, पद्मः, गदा एवञ्च शङ्खं धारयति।[३६] ९. विष्णुः कौयोदकी, पद्मः, पाञ्चजन्यनामकशङ्खः एवञ्च सुदर्शनचक्रं धारयति।[३७] १०. मधुसूदनः-चक्रः, शङ्खः, कमलम् एवञ्च गदा धारयति।[३८] ११. अच्युतः- गदा, पद्मः, शङ्खः एवञ्च चक्रेण समन्वितः वर्तते।[३९] १२. उपेन्द्रः शङ्खं गदा, चक्रः एवञ्च कमलं धारयति।[४०] १३. प्रद्युम्नः स्वहस्तेषु चक्रः, शङ्खः, गदा एवञ्च कमलं धारयति।[४१] १४. त्रिविक्रमः स्वहस्तेषु गदा, चक्रः एवञ्च शङ्खः धारयति।[४२] १५. नरसिंहः चक्रः, कमलम्, गदा एवञ्च शङ्खेन सह विराजमानः वर्तते।[४३] १६. जनार्दनः कमलं, चक्रः, शङ्ख तथा कौमोदकीगदां धारयति।[४४] १७. वामनः- वामनस्य हस्ते शङ्खः, चक्रः गदा तथा पद्मः सुशोभितः वर्तते।[४५] १८. श्रीधरः कमलं, चक्रः, गदा एवञ्च शङ्खं धारयति।[४६] १९. अनिरुद्धः चक्रः गदा शङ्खः तथा कमलसहितः वर्तते।[४७] २०. हृषीकेशः गदा, चक्रः, पद्मः तथा शङ्खं धारयति।[४८] २१. पद्मनाभः पाञ्चजन्यनामकशङ्खः कमलं चक्रः एवञ्च गदां धारयति।[४९] २२. दामोदरः कमलं, शङ्खः, गदा एवञ्च सुदर्शनचक्रं धारयति।[५०] २३. हरिः शङ्खः, चक्रः, एवञ्च गदां धारयति।[५१] २४. कृष्णः- कृष्णः पाञ्चजन्यनामकशङ्खः, गदा, पद्मः

---

३२. वासुदेवः- वासुदेवा गदाशङ्खचक्रपद्मधेरा मतः। केशवः- केशवः कमलं कम्बुद्यत्ते चक्रं गदामपि।।

३३. नारायणः- नारायणः कम्बुपत्र (पद्म) गदाचक्रधरो भवेत्। माधवः- माद्यवस्तु गदां चक्रं शङ्ख वहति पङ्कजम्।।
पुरुषोत्तमः- पुरुषोत्तमस्तु पकं पद्मं शङ्ख गदां दधत्

३४. अद्योक्षजः अघोराजः सरसिजे गदां शङ्ख सुदर्शनम्।।

३५. सङ्कर्षणः- सङ्कर्षणो गदा सरसीरूहचक्रं धृत।

३६. गोविन्दः- गोविन्दो धरते चक्रं गदां पद्मं च कम्बुना।

३७. विष्णुः- विष्णुः कौमोदकीं पद्मं पाञ्चजन्यं सुदर्शनम्।

३८. मधुसुदनः- मधुसूदनस्तु चक्रं शङ्खं सरसिजं गदाम्।।

३९. अच्युतः- अच्युतस्तु गदापद्मचक्रशैङ्खे- समन्वितः

४०. उपेन्द्रः- उपेन्द्रो वहते शङ्खं गदां चक्रं कुशेशयम्।।

४१. प्रद्युम्नः- प्रद्युम्नश्च चक्रशङ्खगदाभ्योजानि पाणिनीयः।

४२. त्रिविक्रमः- त्रिविक्रमस्त्रिषु गदाचक्रशङ्खन् विभर्ति चः ।।

४३. नरसिंहः- नरसिंहस्तु चक्राब्जगदाकम्बुविराजितः।

४४. जनार्दनः- जनार्दनोऽम्बुजं चक्रं कम्बुं कौमौदकीं दधौ।।

४५. वामनः- वामनस्तु शङ्खचक्रगदापद्मलसत्करः।

४६. श्रीधरः- श्रीधरो वारिजं चक्रं गदां शङ्खं दधाति च।।

४७. आनिरुद्धः- आनिरुद्धो लसच्चक्रगदाशङ्खारविन्दवान्।


४८. हृषीकेशः- हृषीकेशो गदां चक्रं पद्मं शङ्खं च धारयन्।

४९. पद्मनामः- पद्मनामः पाञ्चजन्यं पद्मं चक्रं गदामपि।

५०. दामोदरः- दामोदरोऽम्बुजं शङ्खं गदां धत्ते सुदर्शनम्।।

५१. हरिः- हरिधारियते कम्बुं चक्रं पद्मं तथा गदाम्।
रू.म.अ-३, पृ. १३७

एवञ्च सुदर्शनचक्रं धारयति।[५२] एतेषां मूर्तीनां हस्तायुधानां क्रमं दक्षिणतः ज्ञातव्यम्।[५३] कृष्णेन सह कार्तिकेयः, कमलं, शक्तिः, ढालः एवञ्च शङ्खं धारयति। गरुडध्वजः गरुडारूढः कमलं शङ्खः तथा ध्वजचिह्नैः युक्तः भवति।[५४] जयन्तः गदा, चक्रः, अक्षः दण्डः पद्मयुक्तः वर्तते। गोवर्द्धनः शङ्खः, चक्रः, गदा एवञ्च पद्मधारयन् सुशोभितः वर्तते।[५५]





मत्स्य



कुर्मावतार

भारतीय शिल्प संहिता, पृ. ४९ भारतीय शिल्प संहिता, पृ. ९४

४. **श्रीविष्णोः दशावतारमूर्त्तयः**– (मत्स्यकूर्मवराहञ्च) विष्णोः दशावताराणां प्रतिमानां प्रसङ्गे अयं ज्ञातव्यः अस्ति यत् प्रथममत्स्यः एवञ्च द्वितीयकूर्मस्य अङ्कनं तु तेषां स्वस्वरूपानुसारम् एव भवति वराहमनुष्याकारः किन्तु तस्य मुखं वराहसदृशम् भवति।



वराहवतार



नृसिंहावतार

भारतीय शिल्प संहिता, पृ. ९५

५२. कृष्णः– कृष्णः केरेः पाञ्चजन्यं गदां पद्मं सुदर्शनम्।
रू.म.अ–३, पृ. १३७ श्लो. २०

५३. एताः सुमूर्त्तयो ज्ञेया दक्षिणाधः करक्रयात्।
वासुदेवादिवर्णाः स्यः स्युः षडे तददादयः?
रू.म.अ–३, पृ. १३७ श्लो. २१

५४. सकृष्णः कात्रिकेग्रोडब्जशक्तिखेटककम्बुचिः।
गरुड़हव जस्ताक्ष्र्यस्थोऽब्पशङ्खध्वजचिह्नवान्।। रू.म.अ–३, पृ. १३७ श्लो. २२

५५. जयन्तोऽक्षचक्रदण्डपद्मैर्वान्नसंवृतः।
गोवर्धनोलसच्चक्रशङ् शपद्मैर्गदांहितत् (दधत्)

वराहस्वहस्तेषु गदा कमलञ्च धारयति तथा श्यामवर्णस्य भवति। वराहः स्वश्मश्रोः अग्रभागे पृथ्वीं धारयन् भवति।[५६] (रूपे तु "दंष्ट्रागे तु धृत्ता धरा" भेदं विहाय श्लोकः यथावत् वर्तते। (३, २४) नरसिंहः- भगवान् नरसिंहस्य रूपम् इत्थम् अस्ति ते सिंहसदृशः मुखवान् वर्तते एवञ्च तस्य दन्ताः तीक्ष्णाः एवञ्च उरुचक्रः वर्तते ते राक्षसराजः हिरण्यकश्यपस्य वक्षस्थलं स्वद्वाभ्यां हस्ताभ्यां विदीर्णं कुर्वन् प्रदर्शितः क्रियते।[५७] वामनः- वामनः शिखा-सहितः, श्यामवर्णयुक्तदण्डः, छत्रः एवञ्च अम्बुपात्रं कमण्डलुः वा धारयति।[५८] परशुरामः- भगवान् परशुराम अपिनधारणं करोति। तस्य हस्ते परशुः भवति।[५९] रूपमण्डने ३, २६ एतदेव पाठः अस्ति। राम बलरामः-रामः बाणधारयन् एवञ्च श्यामवर्णस्य अस्ति। बलरामः हलं तथा मूसलं धारयति।[६०] बुद्धः-बुद्धः पद्मासने अवस्थितः अस्ति एवञ्च आभूषणं विना एवञ्च केशसहितः कषायवस्त्रं धारयति। सः ध्यानस्थः द्विभुभश्च अस्ति हस्तस्य उपरिभागः हृदयपर्यन्तं स्थितः भवति।।[६१]



बलराम-कृष्णावतार    कल्की

**भारतीय शिल्प संहिता, पृ. ९७**

५६. मत्स्यकूर्मवराहञ्च- मत्स्यकूर्मो (र्य?) स्वरूपौ नृवराहो गदाम्बुजे
विम्रत्स्यामो (विरत्रव्यासा?) वराहास्यो दंष्ठाग्रेणो धृतं धरा।।
वास्तुमञ्जरी, पृ. २६१ श्लो. १०७

५७. नरसिंहः- नृसिंह सिंहवय्योऽतिंदष्टालः कुटिलोसकः।
हिरण्योरस्थलासक्तविदारणकरद्धयः।।
वास्तुमञ्जरी, पृ. २६१ श्लो. १०८

५८. वामनः- वामनः सशिखः (शासिख?) श्यामो (स्याओ?) दण्डी पीताम्बु (दंडापिनोबु?) पात्रवान्?
वास्तुमञ्जरी, पृ. २६१ श्लो. १०८

५९. परशुरामः- जटाजिनधरो रामो भार्गवः परशुं दधत्।।
वास्तुमञ्जरी, पृ. २६१ श्लो. १०९

६०. राम बलरामः- राम शरेषु (सुरेपु?) धृक श्यामः सा (श) शिरमुशतो बलः।
वास्तुमञ्जरी, पृ. २६१ श्लो. १०९

६१. बुद्धः बुद्धः (बुध?) पद्मासनो रक्तस्त्यक्तामरणमूर्धजः (भुर्द्धज?) कषयवस्त्रो ध्यानस्थो द्धिभुजोकोर्ध्वाणिकः।
वास्तुमञ्जरी, पृ. २६१ श्लो. ११०

**कल्किः**- कल्किअवतारः खड्गयुक्तः अश्वारूढः भवति इत्थं विष्णोः दशावताराणां रूपाङ्कनम् अत्र विहितम्।[६२] अथ जलशयनः-जले शयनं कुर्वन् विष्णोः शेषनागस्य शय्यायां सुषुप्तिः। तस्य दक्षिणहस्ते दण्डः भवति तस्योपरि तस्य शिरः भवति। वामहस्ते सः पुष्पं धारयति। विष्णोः नाभिकमले सृष्टिकर्ता ब्रह्मा अस्ति। विष्णोः चरणयोः पार्श्वे एव लक्ष्मी एवञ्च भूमिः (शेष शिरः अपि) अस्ति तेषाम् उभयपार्श्वे मधुः एवञ्च कैटभसहितः निधिः, एवञ्च आयुक्षतादीनां स्वरूपाः अपि भवन्ति।[६३] उक्तद्वे श्रोतरूपे रूपमण्डनात् उद्धृतः वर्तते।

**दामोदरः**- दामोदरस्य प्रतिमायां चतुर्भुजविष्णोः हस्तेषु क्रमशः कमलं, शङ्खः, गदा, चक्रः भवेत्। वर्णः अलसीपुष्पसदृशः भवेत्। देवस्य वामभागे स्वहस्ते पद्मं वामे राधिका निर्मीयात्। सहैव गोपकुमारं गोपस्य वेशः धारणं कुर्यात् तथा हस्ते दण्डः प्रदातव्यः। अपराजिते केवलम् एतदेव सङ्केत अस्ति पद्मशङ्खगदाचक्रं दामोदर उदाहृतम् अग्निपुराणे अपि आयुधक्रमम् एतदेव कथितमस्ति। दामोदरः, पद्मः, शङ्खः गदा-चक्रः नमामि तम्।। (४८, ६)।[६४]

**-वास्तुशास्त्रविभागः ( विद्यावारिधिः )**
**श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविश्वविद्यालयः**
**नवदेहली-११००१६**

---

६२. कल्किः- कल्की (कल्कि?) सखड्गोऽश्ववारूढो हरेरवतरा इमे।।
वास्तुमञ्जरी, पृ. २६१ श्लो. १११

६३. वास्तुमञ्जरी, पृ. २६२, श्लो. ११२-११३
सुप्तरूपं शेषतल्ये दक्षोदण्डभुजोऽस्य
शिरोधरो वा वामस्तु सुपुष्पोऽयं जलेशयः (जलाश्य?)।।
तन्नाभिपंङ्कजे धातां श्रीभूमिचरणान्तिके (वशिरोडहिगे?)
निध्यस्रादि (मध्यश्रादि?) स्वरूपाणी पाश्वयोर्मधुकैटभौ।।

६४. दामोदरः दामोदर साब्ज- शङ्ख-गदा-चक्रोऽसि (शि) तोमतः।
देवस्य वामे कर्त्तव्या पद्महस्ता तु राचिका।।
गोपवेश धरो गोपाः कर्त्तव्या दण्डपाणयः।
वास्तुमञ्जरी, पृ. २६१ श्लो. ११४

# स्वार्थिकप्रत्ययविमर्शः

-डॉ. सुधाकरमिश्रः

**सदाशिवरमारम्भां शङ्कराचार्यमध्यमाम् ।**
**रामयत्नशुक्लपर्यन्तां वन्दे गुरुपरम्पराम् ॥**

काणादं पाणिनीयं च सर्वशास्त्रोपकारकमिति धिया व्याकरणशास्त्रं सर्वोपकारत्वं निर्वहति। व्याकरणशास्त्रस्य बहवो पक्षास्सन्ति। यतो व्याकरणेन शब्दस्वरूपं विश्लेष्यते। शब्दानुशासनस्य नैके अवयवास्सन्ति यथा प्रकृति-प्रत्यय-आगम-आदेश-विकरणोदात्तानुदात्त-स्वरित-सूत्र-वार्तिक-भाष्य-प्रक्रिया-व्याख्या-दर्शनादिशब्दभेदेन। तेषु प्रत्ययस्य व्याकरणे प्रतिमुहूर्तमेव वैशिष्ट्यं प्रतिभाति। तस्य प्रत्ययस्य स्वरूपमधिकृत्य बहव्यः कारिकाः प्रसिद्धास्सन्ति । यथा

**इतरार्थानवच्छिन्न स्वार्थे यो बोधनक्षमः।**
**तिङर्थस्य निभाद्यन्यः स वा प्रत्यय उच्यते ॥**[1]
**प्रकृत्यवधित्वेन विधीयमानत्वं प्रत्ययत्वम् ।**

उपरोक्तलक्षणेषु तस्यार्था एव मुख्याधारभूताः प्रकल्पितास्सन्ति। इदमपि स्पष्टं यत् लोकव्यवहाराश्रितमिदं व्याकरणशास्त्रं वाक्यस्फोटं मुख्यं प्रकल्पयत् व्यवहारदशायां भाषायाः लघूपायेन सरलशिक्षकवत् वर्णस्फोटं तात्पर्यं प्रकृतिप्रत्ययं व्याख्याति। अस्यामवस्थायां प्रत्ययानां सार्थक्यं सर्वदैवाभिप्रेतम्।

यथा आरम्भ एव भाष्यकारेण प्रोक्तं न केवला प्रकृतिः प्रयोक्तव्या, न केवलः प्रत्ययः। तात्पर्यं प्रकृतिप्रत्ययविशिष्टस्यैव प्रयोगः कर्तव्य इति। प्रत्ययो नाम स्व स्व प्रकृत्यन्तरार्थप्रत्यायकस्यैव प्रत्ययत्वम्। प्रकृत्यर्थत्वञ्च कथं बुध्यते तदा प्रोक्तं धातुपाठकोशादौ तमुच्चार्यबोधितत्वम्। एषां तथा नास्ति तेषां स्थान्यर्थारोपेण प्रकृतित्वं बोध्यते, यथा नभबधादीनाम्। प्रत्यायाः नाना विधाः, सुप्प्रत्ययाः, तिङ्प्रत्ययाः, कृत्संज्ञकप्रत्ययाः, तद्धितसंज्ञकप्रत्ययाः। तेष्वपि कर्त्रर्थकाः, कर्मार्थकाः, भावार्थकाः। तत्र तद्धितेषु साधारणप्रत्ययाः, अपत्याधिकारप्रत्ययाः, रक्ताद्यर्थकाः, चातुरार्थिकाः, शैषिकाः, प्राग्दीव्यतीयाः, ठगाधिकारीयाः, प्राग्घितीयाः, छयदधिकारीयाः आर्हीयाः, ठञधिकारीयाः, भावकर्मार्थकाः, पाञ्चमिकाः, मत्वर्थीयाः, प्राग्दिशीयाः, प्रागिवीयाः स्वार्थिकाश्च । तेषु मध्ये मम विषयः स्वार्थिकाः ये प्रत्ययाः त एव। स्वार्थशब्दोपि विचारणीयाः, लोके स्वार्थशब्दः आत्मानं परित्यज्य न किमपि वदति, परन्तु शास्त्रे स्वार्थोपि परार्थं पारिभाषिकञ्च गृह्यते। स्वार्थिकाः प्रत्ययाः प्रकृत्यर्थमेव वदन्ति यथा ते प्रत्ययाः यथा "इवे प्रतिकृतौ" संज्ञायां च, कन् प्रत्ययः, बस्तेर्ढञ् ढञ्प्रत्ययः, शिलायाः ढः इति ढप्रत्ययः, शाखादिभ्यो यः इति यप्रत्ययः, कुशाग्राच्छः इति छप्रत्यये, शर्करादिभ्यो अण् इति अण् प्रत्ययः, कर्कलोहितादीकक् इति ईकक् प्रत्ययः। इतोपि प्रत्ययाः सन्ति। अयं प्रत्ययः स्वार्थिकः अत्यन्तस्वार्थिकश्च। अत्र क्रमशः विचारः प्रस्तूयते यत् तद्धित एका वृत्तिः । वृत्तिर्नाम "परार्थाभिधानं वृत्तिः"[2] तात्पर्यं यदि प्रकृतिप्रत्ययौ

१. शब्दशक्तिप्रकाशिका १०

२. लघुसिद्धान्तकौमुदी समासप्रक्रियायाम्

मिलित्वा कमपि नवीनमर्थं बोधयतः। तदा वृत्तिरिति पदं संगच्छते यथा उपगोरपत्यम् औपगवः, औपगवपदस्य तु पुत्र इत्यर्थः। गोमान्पदस्य स्वामी अर्थः, परन्तु स्वार्थिकप्रत्ययप्रकरणे तादृशं किमपि पार्थक्यन्नास्ति। तर्हि अत्र वृत्तिघटते न वा इति विचारः। अस्योत्तरमाचार्येण प्रकरणप्रथमसूत्रे 'समर्थानां प्रथमाद्वा'[3] इत्यत्र प्रोक्तं स्वार्थिकप्रत्ययावधिश्चायमधिकारः। स्वार्थे प्रकृत्यर्थे भवाः स्वार्थिकाः। "अध्यात्मादित्वाट्ठञ्"। स्वार्थिकाः प्रत्ययाः अवधिर्मर्यादा: यस्य स। अनेन यतः परेण स्वार्थिकाः प्रत्ययाः अवधिभूताः प्रवर्तन्ते, तत् सूत्रं दर्शयन् प्रागयमधिकार इत्याचष्टे। किं पुनः कारणं स्वार्थिकेष्वपयमधिकारो न प्रवर्तते। स्वार्थिकप्रत्ययावधिप्राग् सम्बद्धार्थानामित्येषोऽर्थः। सम्बद्धता च द्विष्ठत्वात् प्रतियोगिनि सति भवति। स्वार्थिकानाञ्च प्रकृत्यर्थादर्थान्तरं न सम्भवति। यत्प्रत्यायनाय शब्दान्तरं प्रयुज्यते तदपेक्षया च समर्थता स्यात्। तस्मात् समर्थतायाः अभावात् स्वार्थिकेषु समर्थानामित्येतत् तावन्नोपयुज्यते। अत एव प्रतियोगिनोऽभावात् प्रथमादित्येतदपि नोपयुज्यते। यदि हि प्रतियोगिशब्दान्तरं स्यात् तदा आशङ्का स्यात् किं प्रथमात् प्रत्ययः, उत द्वितीयादिति ततश्च तन्निवृत्तये प्रथमादित वचनमनुवर्तमानमर्थवत् स्यात्। असति तु द्वितीये प्रतियोगिनि तदनुवृत्तिः नोपयुज्यते। विकल्पोऽपि तत्र अनवस्थित इति अनियत इति। केचित् स्वार्थिकाः नित्यमेव भवन्ति। यथा "अषडक्षाशितङ्ग्वलंकर्मालम्"[4] इति सूत्रे भाष्यकारः परिगणनं करिष्यति के पुनर्नित्याः प्रत्ययाः, तमादयः प्राक् कात्, ञ्यादयः प्राग्वुनः, आमादयः प्राङ्मयटः बृहत्या जात्यन्तात् समासान्ताश्च इति । तत्र "अतिशायने तमबिष्ठनौ"[5] इति तमप्प्रभृतयो ये प्रत्ययाः प्राग्गिवात् कः इत्येतस्मात् प्राक् ते नित्याः। तथा "पूगाञ्ञ्योऽग्रामणीपूर्वात्"[6] इत्यतो ञप्रत्ययात् प्रभृति 'पादशतस्य संख्यायादेर्वीप्सायां वुम्लोपश्च'[7] इत्यतो वुनः प्राग् ये ते नित्याः। तथा "किमेतिङव्ययघादाम्वद्रव्यप्रकर्षे"[8] इत्यतः आम् प्रभृति प्राक् तत्प्रकृतिवचने मयटो ये प्रत्ययास्ते नित्याः तथा "बृहत्याच्छादने"[9] इति विहितः कप्रत्ययः, "जात्यन्ताच्छोबन्धुनि"[10] इति च यश्च प्रत्ययो, ये समासान्ता डजादयस्ते सर्वे नित्याः। तस्माद् विकल्पः स्वार्थिकेष्वनवस्थितः। ततश्च वा ग्रहणमपि तत्रानवस्थितमेव। तस्मात् समर्थानां वा इति स्वार्थिके अनियत इति।

**तथैव स्वार्थिकाः केचित् संघातान्तरवृत्तयः ।**
**अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः ॥**[11]

यथा उपसर्गाः अनर्थकाः भवन्ति तथैव केचन प्रत्यया अपि अनर्थकाः भवन्ति। प्रकृत्यर्थमेव वदन्ति। अतः तेषां कश्चन विशिष्टार्थो न भवति। तात्पर्यं ते अनर्थका एव भवन्ति। अनुवादका एव इत्यर्थः। अत्र अनुवादकतात्पर्यं केवलं प्रकृत्यर्थमेवानुवदति तथा नास्ति, अपितु प्रकृत्यर्थस्योपस्कारकाः भवन्ति। अन्यथा पटुः पटुतमः पटिष्ठः। रामः, रामकः। वृक्षः, वृक्षकः। बालः, बालकः। इत्यादि स्थलेषु विशेषधर्माधानरूपं उपस्कार-

३. पा.सू.४.१.८२
४. पा.सू.५.४.७
५. पा.सू.५.३.५५
६. पा.सू.५.२.१११
७. पा.सू.५.४.१
८. पा.सू.५.४.११
९. पा.सू.५.४.६
१०. पा.सू.५.४.९
११. वाक्यपदीयम् २.१९१

संवलितं अनुवादकं न सिध्यति। अत्रापि स्वार्थिक-अत्यन्तस्वार्थिक रूपद्वयं प्राप्यते। अनुवादकपक्ष अत्यन्तस्वार्थिकप्रत्ययविषये एव सम्भवति। यथा याव एव यावकः। प्रज्ञ एव प्राज्ञः। अत्यन्तस्वार्थिकप्रत्ययानामपि आरोपेणार्थवत्वं स्वीकुर्वन्ति आचार्याः। यदि तेषामर्थवत्वं न स्यात्तदा आगमत्वं स्यात्। यतो हि एते प्रत्ययस्वभावविशिष्टाः भवन्ति, प्रत्ययगुणधर्मतुल्याः भवन्ति। अत्र प्रत्ययत्वं स्थिरं स्यात् तदर्थमेव आरोपाङ्गीकरो आवश्यकः। एते स्वार्थिकाः प्रत्ययाः तद्धितसंज्ञकविशिष्टाः भवन्ति। तद्धितपदम् तत् हितशब्दयोः समासेन सिद्धयति। "हितयोगे"[१२] चतुर्थीविभक्तेः विधानं भवति तर्हि तस्मै, ताभ्याम्, तेभ्यो वा हितो हिता वा तद्धिताः। अत्र विद्यमानं यत् तत्पदं तेन पूर्वोक्तानां समाससुबन्तादीनां ग्रहणं भवति। तात्पर्यं तेषां हितार्थं तेषां स्थाने तेषामभावेऽपि प्रतिपाद्यमानार्थस्य बोधनार्थम् अध्येष्यमाणाः ते प्रत्ययाः तद्धितपदवाच्याः व्यवहृताः भवन्ति। अनेन कथनेन स्पष्टमिदं भवति यत् तद्धितसंज्ञकप्रत्ययान्तानां प्रयोगो वैकल्पिकः ऐच्छिको वा भवति। यदि वयं देवदत्तस्य पुत्रं तद्धितान्तेन प्रयोगं कर्तुमिच्छामस्तदा दैवदत्तिः। अन्यथा देवदत्तस्य पुत्रः, अथवा देवदत्तपुत्रः इत्यादि पदानामपि प्रयोगो सम्भवति। इदमेव एतेषां प्रत्ययानां हितत्वमिति। एते प्रत्ययाः तेषामभावेऽपि सम्बद्धार्थस्याभिव्यञ्जकाः भवन्ति। तद्धितेति महासंज्ञयापि स्पष्टमिदं भवति यत् सुबन्ताः विकल्परूपेण प्रयुक्ताः भवन्ति।

**तद्धितप्रत्ययानामुद्देश्यत्वम्**-सुबन्तात्तद्धितोत्पत्तिरिति प्रसिद्धम्। तथा च भाष्यम्- स्वार्थद्रव्यलिङ्गसंख्या-कारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोगः।[१३] तात्पर्यं तद्धितसंज्ञकाः प्रत्ययाः सुबन्तादुत्पन्नाः भवन्ति। तस्य विधानानन्तरं तेषां सुप्प्रत्ययानां लोपो भवति। परन्त्वत्रावधेयं यत् सर्वे तद्धिताः तथा न भवन्ति। अपितु ये सार्थकाः तद्धिताः भवन्ति तेषामेव उपर्युक्तनियमो प्रवर्तते। यतो हि तेनार्थेन सम्बन्धं कर्तुं प्रकृतिः यदा स्वार्थेन परिपूर्णं भवति तदैव सार्थकाः तद्धिताः तेभ्यो उत्पद्यन्ते। स्वार्थेन परिपूर्णं नाम जातिव्यक्तिलिङ्संख्याकारकैः परिपूर्णमिति। प्रायः प्रत्येकं पदे एते अर्थाः निहिताः भवन्ति। परन्तु ये तद्धितसंज्ञकाः प्रत्ययाः प्रकृत्यर्थस्य उत्कर्षापकर्षमात्रं द्योतयन्ति अथवा केवलं प्रकृत्यर्थमात्रमभिदधति, ते साक्षात् प्रातिपदिकादेव विहिताः भवन्ति। तेष्वर्थेषु प्रकृत्यर्थस्य सम्बन्धो न कर्तव्यो न भवति। अपितु प्रकृत्यर्थेनाभिन्नार्थकत्वं प्रकाशयन्ति। अतः तेषां विधानार्थं प्रकृत्यर्थस्यावश्यकता न भवति। एवं रूपेण स्वार्थिकाः अत्यन्तस्वार्थिकाश्च प्रत्ययाः भवन्ति। तात्पर्यं प्रकृत्यर्थगतं वैशिष्ट्यं ते प्रतिपादयन्ति। यथा अतिशयेन पटुः पटुतमः। ह्रस्वो बालः बालकः। अत्र तमप्रत्ययः, कप्रत्ययश्च प्रकृत्यर्थगतं अतिशयितत्वं ह्रस्वत्वञ्च द्योतयतः। अतः एते तद्धितप्रत्ययाः स्वार्थिकाः, अत्यन्तस्वार्थिकाश्च व्यवहृताः भवन्ति। एतेषां विधानं प्रातिपदिकात् प्रकृतेः भवति। वैयाकरणाः समर्थानां प्रथमाद् वा इति सूत्रस्याधिकारः प्राग्दिशीयो विभक्तिपर्यन्तमेव स्वीकुर्वन्ति। अतः परं विधीयमानाः प्रत्ययाः स्वार्थिकाः भवन्ति। एतेषां स्वार्थिकानां अत्यन्तस्वार्थिकानां च विधानं वैयाकरणभट्टोजिदीक्षितः प्राग्दिशीयप्रकरणे, प्रागिवीयप्रकरणे च प्रतिपादितवान् ।

**स्वार्थिकाः प्रत्ययाः**- स्वार्थिकप्रत्ययेषु अवयवार्थातिरिक्तातिरिक्तानामर्थान्तरप्रतीतिर्न भवति। तात्पर्यं प्रकृतिभूतार्थातिरिक्तार्थाप्रत्यायकत्वं स्वार्थिकप्रकरणत्वम्। यत्र प्रकृतेरपि सैवार्थः प्रकृतिप्रत्यययोः समुदायस्यापि सैवार्थः त एवात्यन्तस्वार्थिकाः इति। महावैयाकरणः भर्तृहरिरपि आह-एते प्रत्ययाः द्विविधाः असत्वभूतार्थाः,

१२. परिक्रयणे सम्प्रदानमन्यतरस्याम् सूत्रे वार्तिकम्

१३. कुत्सिते सूत्रे भाष्ये

सत्वभूतार्थकाश्च। एते प्रत्यया: वाचका:, द्योतका:, विशेषका:, सहायकाभिधायका:, सार्थका:, निरर्थकाश्च। षड्विधा: भवन्ति। प्रकृत्यर्थस्य पूर्णताप्रदानकर्तारो ये प्रत्यया: ते स्वार्थिका: प्रत्यया: भवन्ति। तस्यैव नाम स्वार्थिका: प्रत्यया इति। येषां कश्चनर्थो न भवति इति निषेधस्य तात्पर्यमित्थं ज्ञेयम् एते स्वार्थिका: प्रत्यया: प्रकृत्यर्थे विस्तारं संकोचं वा कुर्वन्ति। अत एव एते प्रत्यया: अत्यन्तस्वार्थिकाद् प्रत्ययात् भिन्ना: भवन्ति। एकं द्वयं च प्रत्ययं त्यक्त्वा प्रकृतिभिन्नार्थकत्वं न प्रत्यायन्ति। यदि भिन्नार्थकस्य प्रतीतिर्भवति चेत् तदा संज्ञात्वेन परिगणिता: भवन्ति। अन्यथा सर्वेऽपि शब्दरूपविशिष्टा: विशेषणीभूता: भवन्ति। एते प्रत्यया: महाविभाषाधिकारे प्रोक्तास्सन्ति। फलत: तेषां प्रयोगोपि विकल्पविशिष्टा एव सन्ति। प्रयोक्ता यदि एतेषां प्रयोगं कर्तुं नेच्छति तदा विग्रहवाक्यादपि तस्य रूपं प्रकटयितुं शक्नोति। कानिचन उदाहरणानि यथा-शार्करम्-शर्करा इव शार्करम्। शर्करा शब्दात् शर्करादिभ्योऽण् इति सूत्रेण इवार्थे अण् प्रत्यये। शर्करा सु अण् तद्धितान्तत्वात् प्रातिपदिकसंज्ञायाम्। 'सुपो धातुप्रातिपदिकयो:' इति सूत्रेण सु लुकि। भसंज्ञायाम्। 'यस्येति च' इति आकारलोपे। 'तद्धितेष्वचामादे:' इति सूत्रेण आदिवृद्धौ। विभक्तिकार्ये। नपुंसकलिङ्गे सति शार्करमिति। एवमेव आयुधसंघार्थे पार्शव:। मत्स्यार्थे वैसारिण:। ओषधिविशेषे औषधम्। क्रियमाणार्थे-कार्मणम्। अज्ञातार्थे अनुकम्पितार्थे निन्दितार्थे अल्पार्थे ह्रस्वार्थे अकच् प्रत्ययविशिष्ट उच्चैक:, पचतकि, एहकि: वृक्षक:, अश्वक:,। निर्धारणार्थे -यक: सक:। भागार्थे षाष्ठ:, षष्ठ:। पूरणार्थे -चतुर्थ:। तीयप्रत्ययान्त: पूरणार्थ: द्वितीय:। वीप्सादण्डदानार्थे द्विपदिकाम्। अनुकम्पार्थे उपक:, सिंहक:। उपड:। देविक:। देविय:। देविल:। सादृश्यार्थे एकशालिक:, ऐकशालिक:। आङ्गुलिक:। सन्देशार्थे वाचिकम्। सदृशार्थे कार्कीक:। निर्धारणे कतर:। आधिक्यार्थे कतर:। एकतम:। कतम:। असहायार्थे एकाकी, एकक:, एक:। प्राचीनार्थे प्रणम् प्रत्नम् प्रतनम् प्रीणम्। नवीनार्थे नूत्नम् प्रतीचीनम्। सादृश्यार्थे कुशाग्रीय:, काकतालीय:। व्यक्तिविशेषार्थे-ब्राह्मणजातीय:। आकृत्यार्थे पितृस्थानीय:। सादृश्यार्थे वास्तेयम्। शिलेयम्। शाख्य:। द्रव्यम्। लघ्वर्थे कुतुप:। संज्ञायाम् कासूतरी, वत्सतर:। कूटीर:। द्वयोराधिक्ये लघीयान्। पटीयसी, लघुतर:, कर्तृतर:। बहुषु अधिक: लघिष्ठ:, करिष्ठ, आढ्यतम:। इषदल्पार्थे- विद्वत्कल्प:, विद्वद्देश्य:, विद्धद्देशीय:, बहुपटु:। भूतपूर्वार्थे- आढ्यचर:, कृष्णचर:। प्रकारार्थे पटुजातीय:। निन्दार्थे भिषक्पाश:, शूद्रक:। ओषधिविशेषे तिलपिञ्ज:। तिलपेज:। तादर्थ्ये पितृदेवत्यम्। आतिथ्यम्। प्रशस्तार्थे पटुरूप:, मृत्सा, मृत्स्ना। भूतपूर्वविशेषणे कृष्णरूप्य:। प्रचुरार्थे- अन्नमयम्। स्वभावार्थे-तुष्णीक:। भागार्थे षष्ठक:। अनुकम्पा सान्त्वनार्थे-व्याघ्रक:। ह्रस्वार्थे वंशक:। गर्वार्थे व्याकरणकेन। गर्वित:। प्रतिकृत्यर्थे उष्ट्रक:। सादृश्यार्थे अश्वक:, स्थूलक:। चंचत्क:। सर्पार्थे सुरक:। आच्छादनार्थे बृहत्तिका। शेषावयवसम्बन्धार्थे छिन्नकम्। अनित्यातार्थे लोहितकम्। कालकम्।

**कतिपयतद्धितप्रत्ययवैशिष्ट्यम्**-यथा कप्रत्यय:, अकच् प्रत्यय:, कन्प्रत्यय:, मयट्प्रत्यय:, व्यक्तिवाची प्रत्यय:, तारतम्यबोधकप्रत्यय:।

**काकचोर्वैशिष्ट्यम्**-अज्ञातार्थे कुत्सितार्थे च अकच् क प्रत्यययो: विधानं श्रूयते। कुत्सिते[१४] निन्दार्थे विद्यमानात् प्रातिपदिकात् तिङन्ताच्च स्वार्थे काकचौ प्रत्ययौ भवत:। कुत्सितोऽश्वोऽश्वक:। कुत्सितो गर्दभ: गर्दभक:। कुत्सित: उष्ट्र: उष्ट्रक:। काकचो: यच्च रूप सिद्धं भवति तदपि समानश्रुतिविशिष्टं भवति। अत्र प्रकृते:

१४. पा.सू. ५.३.७४

तद्गतस्थानस्य च पार्थक्यं दृश्यते। अव्ययसर्वनामतिङन्तेभ्यश्च अकच् प्रत्ययो भवति। प्रोक्तञ्च "अव्ययः सर्वनामाकच्प्राक्टेः"[१५] इति पाणिनिसूत्रम् । तेभ्यो भिन्नेभ्यो प्रातिपदिकेभ्यो कप्रत्ययस्य विधानं बोध्यम्। इदमेव प्रकृतिगतवैचित्र्यम्। आचार्यपाणिनेरयं निर्देशः यत् अकच् प्रत्ययः टेः प्राग् भवति, प्रकृतेरन्त्यस्वराद् प्राग् भवति। यथा पचतकि इत्यत्र पचति तस्य अन्तिमो वर्णः इकारः ततः प्राग् अकच्। एवमेव धितः धकित् , एहितः एहकि इति। युष्मद् अस्मद् शब्दात् तु भिन्ना एव स्थितिः। प्रोक्तञ्च भिन्नं वार्तिकम्- 'ओकारसकारभकारादौ सुपि सर्वनामनष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्य'[१६] परन्तु कप्रत्ययस्तु प्रकृतेरन्त एव भवति।

**कन् प्रत्ययवैशिष्ट्यम्**-वैयाकरणाः कन् प्रत्ययमपि विदधति। अत्रापि अवशिष्टं कमात्रं भवति। परन्तु अस्य प्रकृतिः सर्वथा तेभ्यो भिन्नैव। कन् प्रत्ययस्य यदा प्रतिकृतिरर्थे विधानं भवति तदा तेभ्यः तस्य लोपो भवति। तद्यथा वृत्तिग्रन्थे प्राप्यते।

**अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।**
**इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥**[१७]

अर्थात् देवप्रतिमावाचकेभ्यः गणपतिशिवविष्ण्वादिभ्यः शब्देभ्यः अथवा पूजार्थनिर्मितचित्रवाच-करावणकुम्भकर्णादि विशेषशब्देभ्यः प्रतिकृत्यर्थे विहितस्य कन् प्रत्ययस्य लोपो भवति। एवमेव पताकादिषु चित्रितेषु कपिचक्रगरुणादिवाचकेभ्योऽपि तथा देवपथादिगणपठितशब्देभ्यः तस्य कनः लोपो भवति। मनुष्यचञ्चादिसंज्ञावाचकेभ्योपि लोपो भवति। डित्थः काष्ठमयो हस्ती डवित्थः तृणमयो पुमान्। पूजाप्रतिकृतिषु गणपतिः, शिवः, विष्णुः चञ्चादिशब्दा एव साधवः। परन्तु विक्रयणार्थं यदा प्रयोगस्तदा रामकः, सीताकम्, हस्तिकः, इत्यादिकन् प्रत्ययविशिष्टस्य प्रयोगो भवति। क्तप्रत्ययान्तछिन्नभिन्नादिशब्देभ्योपि सम्बन्धज्ञापनार्थं कन् प्रत्ययस्य प्रयोगो भवति। अत्र प्रसिद्ध एकः श्लोकः -

**रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तं च धिक् धिक् ।**
**अस्मिन् पद्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पण्डितं तं च धिक् धिक् ॥**[१८]

रामं लक्ष्मणं सीतां जीविकार्थे विक्रीणीते यो नरस्तं च धिग्धिक्, अस्मिन् पद्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पण्डितं तं धिग्धिक् । अयं भावः अपण्ये इत्युक्तत्वात्पण्ये हस्तिकानितिवत् रामकं सीतिकां लक्ष्मणकमिति प्रयोगा एव साधव इति।

**मयट् प्रत्ययवैशिष्ट्यम्**- 'तत्प्रकृतवचने मयट्'[१९] इति सूत्रे कथितं वचनेति वचनं भावसाधनम् अधिकरणसाधनञ्चेति उभयविधम्। उच्यते असौ इति वचनम्। उच्यते अस्मिन् इति वचनम्। तथा च मयट् प्रत्ययस्यापि द्विधाऽर्थोऽपि। भावपक्षे प्राचुर्यार्थो प्रकृत्यर्थे विशेषणीभवति। अस्मिन्नर्थे निष्पन्नं रूपं संज्ञार्थमभिदधाति। अस्य विपरीतमेवाधिकरणार्थे प्रकृत्यर्थस्य प्राचुर्यविशिष्टाभिन्नाश्रयार्थस्य प्रतीतिर्भवति। फलतः अस्मिन्नर्थे निष्पन्नं रूपं विशेषणविशिष्टं भवति। यथा अन्नमयो यज्ञः। अपूपमयं पर्व। ग्रन्थमयीशाला इत्यादि।

---

१५. पा.सू. ५.३.७३

१६. वार्तिकम् ३२४८

१७. वृत्तिग्रन्थः

१८. जीविकार्थे चापण्ये सूत्रे वालमनोरमायाम्

१९. पा.सू. ५.४.२१

प्राचुर्यविशिष्टेभ्यो वस्तुभ्यो मयट् भवति। समूहार्थमपि बोधयति। उक्त परिस्थितौ मोदकमयं मौदकिकम्। शष्कुलीमयं शाष्कुलिकम्।

**व्यक्तिवाची नाम**–लोकव्यवहारे बालकानां नाम्नः उच्चारणे तदनुरूपं लघुरूपं कृत्वा अथवा सरलं कञ्चितप्रत्ययं च संयोज्य सरलपद्धत्या करणीयं भवति। अस्याः प्रवृत्तेः मूलं संस्कृतभाषायां वुच्, अडच्, ल, इल एवं घनादिप्रत्ययानामध्ययनकाले ज्ञातं भवति। यदि नाम्नः अग्रे उपशब्दयुक्तो भवति तदा दयाभावार्थकः, सान्त्वनार्थकः, वुक् प्रत्ययः(अक) अथवा अडच् प्रत्ययो भवति। तथा उपशब्दानन्तरम् इन्द्रपदं, दत्तपदं अथवा अन्यः कश्चन शब्दो वा भवति तस्य लोपो भवति। यदि उपशब्दातिरिक्तः कश्चन भिन्नोपि शब्दो भवति, तदा अथवा तदनन्तरं एकं पदं, पदद्वयं व भवति तदा प्रथमस्यैव अवशिष्टता भवति। तदुत्तरवर्तिपदस्य लोपो भवति। अवशिष्टादेव घ (इय) छ (ईय) अथवा इलच् प्रत्ययस्य व्यवहारो भवति। यथा कस्यापि बालस्य नाम चन्द्रकान्तः अस्ति तत्र चन्द्रियः, चन्द्रिलः, चन्द्रीयः इत्यादि प्रयोगाः भवन्ति। अत्र शेषशब्दैव लुप्यमानस्य बोधको भवति। अत्र अल्पशब्दैः अधिकार्थप्रत्यायनप्रवृत्तिपरिलक्षिता भवति। स्मरणीयं यत् एवं विधानां शब्दानां प्रयोगः स्वापेक्षया ये लघवः पदलघवः तेषां कृते भवति। लघुभूतानां बालानां च कृते भवति। तेषामुपरि एव अनुकम्पा कर्तुं सम्भवति तस्मै एव सान्त्वना देया भवति। प्रेम अपि देयं भवति।

**तारतम्यबोधकाः प्रत्ययाः**– 'अतिशायने तमबिष्ठनौ'[२०] 'तिङश्च'[२१] 'द्विवचनविभज्योपपदे तरबीयसुनौ'[२२] 'अजादी गुणवचनादेव'[२३] तरप्, तमप्, इयसुन्, इष्ठन् प्रत्ययाः यदा विभागकरणकाले द्वयोर्मध्ये अथवा बहूनामध्ये च एकस्य वैशिष्ट्यप्रतिपादनं स्यात् तदा एते विहिताः भवन्ति। तेषु इयसुन्, इष्ठन् प्रत्ययौ विभाजकधर्मगुणवाचिभ्यो भवतः। अन्यथा तरप् तमपौ प्रयुक्तौ भवतः। यथा पाचकः क्रियावाची अस्ति अतः अत्र पाचकतमः पाचकतरः इत्येव भवति। यदा कदा क्रियावाचिभ्यो इष्ठन् इयसुन् प्रत्ययौ भवतः, परन्तु सा व्यवस्था वैदिकी व्यवस्थैव। यथा करिष्ठः, दोहीयसी। परन्तु यदा कदा एते प्रत्ययाः लोकेपि प्रयुक्ताः भवन्ति।

**अत्यन्तस्वार्थिकाः तद्धितप्रत्ययाः** – स्वार्थिकादतिरिक्ताः अपि प्रत्ययाः विद्यन्ते। यस्य नाम भवति अत्यन्तस्वार्थिकाः प्रत्ययाः। प्रोक्तञ्च आचार्यनागेशभट्टेन उभशब्दाद् वृत्तिविषयेऽत्यन्तस्वार्थिकायज्विधानार्थम्। (लघुशब्देन्देशेखरः, अजन्तपुल्लिङ्गद्विवचनपरत्वाभावेनेति प्रतीके) अत्यन्तस्वार्थिकाः प्रत्ययाः प्रकृत्यर्थे वैशिष्ट्यन्नोपपाद्यन्ते। अपितु एते स्व तात्पर्यं प्रकृत्यर्थमेव व्यक्तं कुर्वन्ति। यथा याव एव यावकः। प्रज्ञः एव प्राज्ञः। इत्यादिस्थले विधीयमानः अण् प्रत्ययः प्रकृत्यर्थमेवाभिदधाति। एते प्रत्ययाः अपि प्रातिपदिकप्रकृतितः एव भवन्ति। यदि अत्र स्वार्थिकात्यन्तस्वार्थिकप्रत्ययोर्मध्ये पार्थक्यं प्रतिपाद्यते तदा विभक्तिविशिष्टेभ्यः ये प्रत्ययाः तद्धिताः विहिताः भवन्ति ते स्वार्थिकाः भवन्ति। परन्तु ये प्रत्ययाः साक्षात् प्रकृतितः एव विहिताः भवन्ति ते अत्यन्तस्वार्थिकाः भवन्ति। अत्यन्तस्वार्थिकाः प्रत्ययाः प्रकृत्यर्थापेक्षया अधिकं न कथयन्ति, अपितु विशेषाधानं कुर्वन्ति। एते प्रत्ययाः प्रकृत्यर्थस्य कस्यापि वैशिष्ट्यस्य सूचनां न यच्छन्ति। एतेषामभावे प्रकृत्यर्थो यथा भवति

---

२०. पा.सू. ५.३.५५

२१. पा.सू. ५.३.५६

२२. पा.सू. ५.३.५७

२३. पा.सू. ५.३.५८

तथैव संयोगेऽपि तदेवार्थः। अत एव अत्यन्तस्वार्थिकत्वं निर्वहन्ति। अत्यन्तस्वार्थिकानां किमपि भिन्नं प्रकरणन्नास्ति अपितु स्वार्थिकप्रकरणे एव विवेचितास्सन्ति। तद्राजनाम्नापि अस्यैव व्यवहारो भवति। कानिचन उदाहरणानि यथा –त्रैष्टुभम्। सांराविणः, प्राज्ञः, पार्शवः। यौधेयः। आग्नीध्री, साधारणी। द्वैधानि, त्रैधानि। वैनयिकः। आनुगादिकः। द्वैतीयीकः। अषडक्षीणः। अलङ्कर्मीणः। नवीनः। दामनीयः। वार्केण्यः। औषधेयम्। अविकः। यावकः। देवता। मृत्तिका। तावद्वयसम्। भागधेयम्। तावन्मात्रम्। लौहितध्वज्यः। कौञ्जायन्यः। आनन्त्यम्। आभिजित्यः। बैदभृत्यः। चातुर्वर्ण्यम्। क्षौद्रक्वः। मालव्यः। एते प्रत्यया अपि स्वप्रकृतिभ्यः नित्यविहिताः न भवन्ति यतोहि एतेषां संयोगाभावेपि प्रकृतिस्वकीयमर्थं बोधयितुं समर्था भवति। अवश्यमेवेदं भवति यत् प्रत्ययसंयोगेन प्रकृतिस्वरूप अवश्यमेव परिवर्तनं भवति। यथा प्रज्ञ एव प्राज्ञः, अनन्तम् एव आनन्त्यम्। विनयः एव वैनयिकः इत्यादयः। उभयविधरूपेपि अर्थदृष्ट्या कश्चन परिवर्तनं न भवति। वाक्ये उभयोः शब्दयोः व्यवहारः समानमेव। किन्तु संघ, पूग, व्रातादिसंज्ञावाचकशब्देभ्यः अवश्यमेव प्रत्ययानां संयोगः कर्तव्यो भवति। यतोहि येनं विना अभीष्टार्थस्य प्रतीतिर्न भवति।

**पूगशब्दः व्रातशब्दः संघशब्दश्च** – एते शब्दाः ऐतिहासिकदृष्ट्या महत्त्वपूर्णाः सन्ति। पर्वतीयक्षेत्रे अनेकानाम् आदिमजातीनां संघानां कृते पूगव्रातशब्दयोः प्रयोगो भवति। (नानाजातीयः अनियतवृत्तयो, अर्थकामप्रधानाः संघाः पूगाः। भारोद्वहनादिशरीराया सजीवनात् नाना जातीयानाम् अनियतवृत्तीनां संघो व्रातः) "पूगाञ्ञ्योऽग्रामणीपूर्वात्"[२४] एतासां जातीनां जीविका निश्चिता न भवति। धर्मे तेषां निमेषमात्रमपि अस्था न भवति। एतेषां जीवने अर्थः कामश्च द्वौ पुरुषार्थौ भवतः। आजीविकानिमित्तं किमपि कर्तुं शक्नुवन्ति। उदाहरणेन स्पष्टमिदं भवति यत् एतेषां बहवः संघाः आसन् प्रतिसंघं एकः राजा नेता वा भवति स्म। प्रतिसंघं पृथक् ध्वजा भवति स्म। तेषां नाम अपि पृथक् भवति स्म। तस्मात् नाम्नः अपत्यार्थे, राजार्थे, संघार्थे प्रत्यया भवन्ति। इतोऽपि लौहितध्वज्यः, कापोतपाक्यः। क्रौञ्जायन्यः। ब्राघ्रायन्यः। "आयुधजीविसङ्घाञ्ञ्यड् बाहीकेष्वब्राह्मणराजन्यात्"[२५] इति सूत्रे बाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट्। क्षौद्रक्यः, क्षुद्रको नाम कश्चिद् आयुधजीविनां बाहीकदेशवासिनां संघः। मालब्यः, मालवो नाम कश्चिद् बाहीकेषु आयुधजीविनां संघः। टित्वान्ङीप् क्षौद्रकी। कौण्डोपरथीयः, दाण्डकीयः, क्रौष्टुकीयः, जालमानीयः, ब्राह्मगुप्तीयः, जालकीयः एते त्रिगर्तषष्ठनाम्नापि अभिहिताः भवन्ति। "दामन्यादित्रिगर्तषष्ठाच्छः"[२६] दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः प्रोक्तञ्च –

**आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।**
**क्रौष्टुकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जालकिः ।**[२७]

तात्पर्यं तद्धितसंज्ञा भिन्ना, कार्यं च भिन्नं स्वार्थिके संज्ञामात्रमेव। "न सामिवचने"[२८] इति सूत्रे सामिपर्याय उपपदे क्तान्तान्तान्न कन्। सामिकृतम्। अर्धकृतम्। अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात् पूर्वेण कन्न प्राप्तः। इदमेव

२४. पा.सू. ५.३.११२
२५. पा.सू. ५.३.११४
२६. पा.सू. ५.३.११६
२७. पा.सू. ५.३.११६ इति सत्रे सिद्धान्तकौमुद्याम्
२८. पा.सू. ५.४.५